॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

सप्तमकाण्डे द्वितीयः प्रश्नः

षड् रात्राद्यानां निरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

सा॒द्ध्या वै दे॒वाः सु॑व॒र्गका॑मा ए॒तꣳ ष॑ड्रा॒त्रम॑पश्य॒न्तमाऽह॑र॒न्तेना॑यजन्त॒ ततो॒ वै ते सु॑व॒र्ग-
ल्लो॒कमा॑य॒न्, य ए॒वव्ँवि॒द्वाꣳस॑ष्षड्रा॒त्रमास॑ते सुव॒र्गमे॒व लो॒कय्ँय॑न्ति देवस॒त्रव्ँवै ष॑ड्रा॒त्रः प्र॒त्यख्ष॒ꣳ॒
ह्ये॑तानि॑ पृ॒ष्ठानि॒ य ए॒वव्ँवि॒द्वाꣳस॑ः षड्रा॒त्रमास॑ते सा॒ख्षादे॒व दे॒वता॑ अ॒भ्यारो॑हन्ति॒ ष॑ड्रा॒त्रो भ॑वति॒
षड्॒ वा ऋ॒तवः॒ षट् पृ॒ष्ठानि॑ ॥ [१] ॥ पृ॒ष्ठैरे॒वर्तू॒नन्वारो॑हन्त्यृ॒तुभि॑ः स॑व्ँवथ्स॒रन्ते स॑व्ँवथ्स॒र ए॒व
प्रति॑ तिष्ठन्ति बृहद्रथन्त॒राभ्या᳚य्ँयन्ती॒यव्ँवाव॑ र॑थंत॒रम॒सौ बृ॒हदा॒भ्यामे॒व य॒न्त्यथो॑ अ॒नयो॑रे॒व प्रति॑
तिष्ठन्त्ये॒ते वै य॒ज्ञस्या᳚ञ्ज॒साय॑नी स्रु॒ती ताभ्या॑मे॒व सु॑व॒र्गल्ँलो॒कय्ँय॑न्ति त्रि॒वृद॑ग्निष्टो॒मो भ॑वति॒ तेज॑
ए॒वाव॑ रुन्धते पञ्चद॒शो भ॑वतीन्द्रि॒यमे॒वाव॑ रुन्धते सप्तद॒शो ॥ [२] ॥ भ॑वत्य॒न्नाद्य॒स्याव॑रुद्ध्या॒
अथो॒ प्रैव तेन॑ जायन्त एकवि॒ꣳ॒शो भ॑वति॒ प्रति॑ष्ठित्या॒ अथो॒ रुच॑मे॒वाऽऽत्मन् द॑धते त्रिण॒वो भ॑वति॒
विजि॑त्यै त्रयस्त्रि॒ꣳ॒शो भ॑वति॒ प्रति॑ष्ठित्यै सदोहविर्द्धा॒निन॑ ए॒तेन॑ षड्रा॒त्रेण॑ यजेर॒न्नाश्व॑त्थी ह॒विर्द्धा॒न-
ञ्चाऽऽ*ग्नी᳚द्ध्रञ्च भवत॒स्तद्धि सु॑व॒र्ग्यं॑ च॒क्रीव॑ती भवतः सुव॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्या उ॒लूख॑लबुद्ध्नो॒
यूपो॑ भवति॒ प्रति॑ष्ठित्यै॒ प्राञ्चो॑ यान्ति॒ प्राङि॑व॒ हि सु॑व॒र्गो ॥ [३] ॥ लो॒कः सर॑स्वत्या यान्त्ये॒ष वै
दे॑व॒यान॒ः पन्था॒स्तमे॒वान्वारो॑हन्त्या॒क्रोश॑न्तो यान्त्यव॑र्तिमे॒वान्यस्मि॑न् प्रति॒षज्य॑ प्रति॒ष्ठाङ्ग॑च्छन्ति
य॒दा दश॑ श॒तङ्कु॒र्वन्त्यथैक॑मु॒त्थान॑ꣳ श॒तायु॑ः पुरु॑षः श॒तेन्द्रि॑य॒ आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑ तिष्ठन्ति य॒दा
श॒तꣳ स॒हस्र॑ङ्कु॒र्वन्त्यथैक॑मु॒त्थान॑ꣳ स॒हस्र॑संमितो॒ वा अ॒सौ लो॒को॑ऽमु॒मे॒व लो॒कम॒भि जय॑न्ति य॒दै
षा᳚म्प्र॒मीये॑त य॒दा वा॒ जीये॑र॒न्नथैक॑मुत्था॒नन्तद्धि ती॒र्थम् ॥ [४] ॥

(पृष्ठानिसप्तदशःसुवर्गोजयन्ति यदै कादश च) ॥ १ ॥

कुसुरुबिन्द औद्दालकिरकामयत पशुमान्थ् स्यामिति स एतꣳ सप्तरात्रमाऽहरत् तेनायजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवारुन्ध य एवँव्विद्वान्थ् सप्तरात्रेण यजते यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्धे सप्तरात्रो भवति सप्त ग्राम्याः पशवः सप्ताऽऽ*रण्याः सप्त छन्दाꣳ-स्युभयस्यावरुद्ध्यै त्रिवृदग्निष्टोमो भवति तेज ॥ [५] ॥ एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्या वरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् धत्ते त्रिणवो भवति विजित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्या वरुद्ध्यै विश्वजिथ् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै यत् प्रत्यक्ष-म्पूर्वेष्वहस्सु पृष्ठान्युपेयुः प्रत्यक्ष ॥ [६] ॥ विँश्वजिति यथा दुग्धामुपसीदत्येवमुत्तममहः स्यान्नैकरात्रश्चन स्याद् बृहद्रथन्तरे पूर्वेष्वहस्सूप यन्तीयँव्वाव रथन्तरमसौ बृहदाभ्यामेव न यन्त्यथो अनयोरेव प्रति तिष्ठन्ति यत् प्रत्यक्षँव्विश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तान्दुहे तादृगेव तत् ॥ [७] ॥

(तेज उपेयुः प्रत्यक्षं द्विचत्वारिꣳशच्च) ॥ २ ॥

बृहस्पतिरकामयत ब्रह्मवर्चसी स्यामिति स एतमष्टरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स ब्रह्मवर्चस्यभवद्य एवँव्विद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरात्रो भवत्यष्टा-क्षरा गायत्री गायत्री ब्रह्मवर्चसङ्गायत्रियैव ब्रह्मवर्चसमव रुन्धेऽष्टरात्रो भवति चतस्रो वै दिश-श्चतस्रोऽवान्तरदिशा दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे ॥ [८] ॥ त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्या वरुद्ध्यै विश्वजिथ् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ॥ [९] ॥

(दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे ऽभिजित्यै) ॥ ३ ॥

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधन्न्यायन्थ्स एतन्नवरात्रमपश्यत् तमाऽहरत् तेना-यजत ततो वै प्रजाभ्योऽकल्पत यर्हि प्रजाः क्षुधन्निगच्छेयुस्तर्हि नवरात्रेण यजेतेमे हि वा एतासाँल्लोका अक्लृप्ता अथैताः क्षुधन्नि गच्छन्तीमानेवाऽऽ*भ्यो लोकान् कल्पयति तान् कल्पमानान् प्रजाभ्योऽनु कल्पते कल्पन्ते ॥ [१०] ॥ ऽस्मा इमे लोका ऊर्जम्प्रजासु दधाति त्रिरात्रेणैवेमल्लोँकङ्कल्पयति त्रिरात्रेणान्तरिक्षन्त्रिरात्रेणामुल्लोँकय्यँथा गुणे गुणमन्वस्यत्येव-मेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलंभावाय ज्योतिर्गौरायुरिति ज्ञाताः स्तोमा भव-न्तीयव्वाँव ज्योतिरन्तरिक्षङ्गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रम्प्रजानां ॥ [११] ॥ गच्छति नवरात्रो भवत्यभिपूर्वमेवाऽस्मिन् तेजो दधाति यो ज्योगामयावी स्याथ् स नवरात्रेण यजेत प्राणा हि वा एतस्या धृता अथैतस्य ज्योगामयति प्राणानेवास्मिन् दाधारोत यदीतासुर्भ-वति जीवत्येव ॥ [१२] ॥

(कल्पन्तेप्रजनां त्रयस्त्रिꣳशच्च) ॥ ४ ॥

प्रजापतिरकामयत प्र जायेयेति स एतन्दशहोतारमपश्यत् तमजुहोत् तेन दशरात्रमसृजत तेन दशरात्रेण प्रा जायत दशरात्राय दीक्षिष्यमाणो दशहोतारञ्जुहुयाद्दशहोत्रैव दशरात्रꣳ सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो य एवव्विँद्वान्दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्दशरात्रो ॥ [१३] ॥ य एवव्विँद्वान्दशरात्रेण यजते प्रैव जायत इन्द्रो वै सदृङ् देवताभिरासीथ् स न व्यावृतमगच्छथ् स प्रजापतिमुपाधावत् तस्मा एतन्दशरात्रम्प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एव-व्विँद्वान् दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति त्रिककुद्वा ॥ [१४] ॥ एष यज्ञो यद्दशरात्रः ककुत् पञ्चदशः ककुदेकविꣳशः ककुत् त्रयस्त्रिꣳशो य एवव्विँद्वान् दशरा-त्रेण यजते त्रिककुदेव समानानाम्भवति यजमानः पञ्चदशो यजमान एकविꣳशो यजमानस्त्र-

यस्त्रिꣳशः पुर इतरा अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनो-पाँव्याधो भवति नैनमभिचरन्थ् स्तृणुते देवासुराः सय्ँयत्ता आसन् ते देवा एता ॥ [१५] ॥ देवपुरा अपश्यन् यद्दशरात्रस्ताः पर्यौहन्त तेषान्न कुतश्चनोपाँव्याधोऽभवत् ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्थ् स्याथ् स दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनो-पाँव्याधो भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः स्तोमस्योपस्तिर्भवति भ्रातृ-व्यमेवोपस्तिङ्कुरुते जामि वा ॥ [१६] ॥ एतत् कुर्वन्ति यज्ज्यायाꣳसꣳ स्तोममुपेत्य कनी-याꣳसमुपयन्ति यदग्निष्टोमसामान्यवस्ताँच्च परस्ताँच्च भवन्त्यजामित्वाय त्रिवृदग्निष्टोमोऽग्नि-ष्टुदाँग्नेयीषु भवति तेज एवाव रुन्धे पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्धे त्रिवृदग्निष्टोमो वैँश्वदेवीषु पुष्टिमेवाव रुन्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत ॥ [१७] ॥ एकविꣳश उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् धत्ते सप्तदशोऽग्निष्टोमः प्राजापत्यासूपहव्य उपहवमेव गच्छति त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै त्रयस्त्रिꣳश उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै विश्वजिथ् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्या-भिजित्यै ॥ [१८] ॥

(प्राजापत्यो वा एष यज्ञो यद् दशरात्र स्त्रिककुद् वा एता वै जायत एकत्रिꣳशच्च) ॥ ५ ॥

ऋतवो वै प्रजाकामाः प्रजान्नाऽविन्दन्त तेऽकामयन्त प्रजाꣳ सृजेमहि प्रजामव रुन्धीमहि प्रजाव्ँविन्देमहि प्रजावन्तः स्यामेति त एतमेकादशरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते प्रजामसृजन्त प्रजामवारुन्धत प्रजामविन्दन्त प्रजावन्तोऽभवन्त ऋतवोऽभवन् तदाँर्तवा-नामार्तवत्वमृतूनाव्ँवा एते पुत्रास्तस्मा ॥ [१९] ॥ दार्तवा उच्यन्ते य एवव्ँविद्वाꣳस एकादश-रात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजाव्ँविन्दन्ते प्रजावन्तो भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताँद्दधते सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः सव्ँवथ्सरन्ते सव्ँवथ्सर एव प्रति तिष्ठन्ति चतुर्विꣳशो भवति चतुर्विꣳशत्यक्षरा गायत्री ॥ [२०] ॥ गायत्रम्ब्रह्मवर्चसङ्गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारिꣳशो भवति चतुष्चत्वारिꣳशदक्षरा त्रिष्टुगिन्द्रियन्त्रिष्टुप् त्रिष्टुभ्येवेन्द्रिये

प्रति तिष्ठन्त्यष्टाचत्वारिꣳशो भवत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्त्येकादशरात्रो भवति पञ्च वा ऋतवं आर्तवाः पञ्चर्तुष्वेवाऽऽ*र्तवेषु सँव्वथ्सरे प्रतिष्ठाय प्रजामव रुन्धतेऽतिरात्राविभितो भवतः प्रजायै परिगृहीत्यै ॥ [२१] ॥

(तस्माद् गायत्र्ये कान्नपञ्चाशाच्च) ॥ ६ ॥

ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथा पूर्वम्प्रजाः कल्पेरन्निति यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्ते यज्ञस्याक्लृप्तिमनु न कल्पन्ते यथा पूर्वमेव प्रजाः कल्पयति न ज्यायाꣳसङ्क-नीयानति क्रामत्यैन्द्रवायवाग्रान् गृह्णीयादामयाविनः प्राणेन वा एष व्यृद्ध्यते यस्याऽऽ*मयति प्राण ऐन्द्रवायवः प्राणेनैवैनꣳ समर्द्धयति मैत्रावरुणाग्रान् गृह्णीरन्येषान्दीक्षितानाम्प्रमीयेत ॥ [२२] ॥ प्राणापानाभ्याँव्वा एते व्यृद्ध्यन्ते येषान्दीक्षितानाम्प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान् गृह्णीताऽऽ*नुजावरोऽश्विनौ वै देवानामानु-जावरौ पश्चेवाग्रम्पर्यैतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रम्परि णयतः शुक्राग्रान् गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषोऽन्तोऽन्तं मनुष्यः ॥ [२३] ॥ श्रियै गत्वा नि वर्ततेऽन्तादेवाऽन्तमा रभते न ततः पापीयान् भवति मन्थ्यग्रान् गृह्णीताभिचरन्नार्तपा-त्रँव्वा एतद्यन्मन्थिपात्रम्मृत्युनैवैनङ्ग्राहयति ताजगार्तिमार्च्छत्याग्रयणाग्रान् गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृद्ध्यते यस्य पिता पितामहः पुण्यो ॥ [२४] ॥ भवत्यथ तन्न प्राप्नोत्युर इवैतद्यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्द्धयति न ततः पापीयान् भवत्युक्थ्याग्रान् गृह्णीताभिचर्यमाणः सर्वेषाँव्वा एतत् पात्राणा-मिन्द्रियय्यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणाति प्रयुङ्क्ते सरस्वत्यभि नो नेषि वस्य इति पुरोरु-चङ्कुर्याद्वाग्वै ॥ [२५] ॥ सरस्वती वाचैवैनमति प्रयुङ्क्ते मा त्वत् क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान् ग्रहान् गृह्णीयादामयाविनः प्राणान् वा एतस्य शुगृच्छति यस्याऽऽ*मयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत यदीता-सुर्भवति जीवत्येव पूर्णान् ग्रहान् गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत् प्राणान् वा एतर्हि प्रजानाꣳ

शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः प्राणानेव प्रजानाꣳ शुचो मुञ्चति ताजक् प्र वर्षति ॥ [२६] ॥

(प्रमीयेत मनुष्य ऋध्यते यस्य पिता पितामहः पुण्योवाग्वाएव पूर्णान् ग्रहान्पञ्चविꣳशतिश्च) ॥ ७ ॥

गायत्रो वा ऐन्द्रवायवो गायत्रम्प्रायणीयमहस्तस्मात् प्रायणीयेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभन्द्वितीयमहस्तस्माद् द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति जागतो वा आग्रयणो जागतन्तृतीयमहस्तस्मात् तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै ॥ [२७] ॥ यज्ञमापद्यच्छन्दाꣳस्याप्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनम्पुनः प्रयुङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते राथन्तरो वा ऐन्द्रवायवो राथन्तरम्पञ्चममहस्तस्मात् पञ्चमेऽह ॥ [२८] ॥ न्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्हतो वै शुक्रो बार्हतꣳ षष्ठमहस्तस्मात् षष्ठेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै द्वितीयँय्यज्ञमापद्यच्छन्दाꣳस्याप्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनम्पुनः प्रयुङ्क्ते त्रिष्टुम्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः ॥ [२९] ॥ शुक्रो यत् सप्तमेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममहस्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णात्येत ॥ [३०] ॥ द्वै तृतीयँय्यज्ञमापद्यच्छन्दाꣳस्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनम्पुनः प्रयुङ्क्तेऽथो स्वमेव छन्दोऽनु पर्यावर्तन्ते पथो वा एतेऽध्यपथेन यन्ति येऽन्येनैन्द्रवायवात् प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य यद्दशममहर्दशमेऽहन्नैन्द्रवायवो गृह्यते यज्ञस्यै ॥ [३१] ॥ वान्तङ्गत्वाऽपथात् पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारँव्वहन्ति तादृगेव तच्छन्दाꣳस्यन्योऽन्यस्य लोकमभ्यध्यायन् तान्येतेनैव देवा व्यवाहयन्नैन्द्रवायवस्य वा एतदायतनँय्यच्चतुर्थमहस्तस्मिन्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽ*यतने नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनँय्यत् पञ्चम ॥ [३२] ॥ महस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्याऽऽ*यतने सप्त-

मेऽहञ्छुक्रो गृह्यत आग्रयणस्य वा एतदायतनय्यँथ् षष्ठमहस्तस्मिञ्छुक्रो गृह्यते तस्माच्छुक्रस्याऽऽ*यतनेऽष्टमेऽहन्नाग्रयणो गृह्यते छन्दाꣳस्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवव्वँदाथो देवताभ्य एव यज्ञे सव्विँदन्दधाति तस्मादिदमन्योऽन्यस्मै ददाति ॥ [३३] ॥

(एतद्वै पञ्चमेऽहन् त्रैष्टुभ एतद् गृह्यते यज्ञस्य पञ्चम मन्यस्मा एकञ्च) ॥ ८ ॥

प्रजापतिरकामयत प्र जायेयेति स एतन्द्वादशरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ य ॥ [३४] ॥ दग्निष्टोमम्पूर्वम्प्रयुञ्जीरन् बहिर्द्धा कनीनिके दद्ध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा मद्ध्यतः कनीनिके प्रति दधति यो वै गायत्रीञ्ज्योतिःपक्षाव्वेँद ज्योतिषा भासा सुवर्गँल्लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य एवव्वँद ज्योतिषा भासा सुवर्गँल्लोक ॥ [३५] ॥ मेति प्रजापतिर्वा एष द्वादशधा विहितो यद् द्वादशरात्रो यावतिरात्रौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्थ्सद्ध वै सत्रेण स्पृणोति प्राणा वै सत् प्राणानेव स्पृणोति सर्वासाव्वाँ एते प्रजानाम्प्राणैरासते ये सत्रमासते तस्मात् पृच्छन्ति किमेते सत्रिण इति प्रियः प्रजाना मुत्थितो भवति य एवव्वँद ॥ [३६] ॥

(अग्निष्टोमौ यथ् सुवर्गँल्लोकं प्रियः प्रजानां पञ्च च) ॥ ९ ॥

न वा एषोऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्राभवदूर्द्ध्वो ह वा एष आतत आसीत् ते देवा एतव्वैँश्वानरम्पर्यौहन्थ् सुवर्गस्य लोकस्य प्रभूत्या ऋतवो वा एतेन प्रजापतिमयाजयन् तेष्वार्द्ध्नोदधि तदृद्ध्नोति ह वा ऋत्विक्षु य एवव्विँद्वान् द्वादशाहेन यजते तेऽस्मिन्नैच्छन्त स रसमह वसन्ताय प्रायच्छ ॥ [३७] ॥ द्यवङ्ग्रीष्मायौषधीर्वर्षाभ्यो व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्यान्तेनेन्द्रम्प्रजापतिरयाजयत् ततो वा इन्द्र इन्द्रोऽभवत् तस्मादाहुरानुजावरस्य यज्ञ इति

स ह्येतेनाऽग्रेऽयजतैष ह वै कुणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपङ्गौर्वा अन्नय्येन पात्रेणान्नम्बिभ्रति यत् तन्न निर्णेनिजति ततोऽधि ॥ [३८] ॥ मलञ्जायत एक एव यजेतैको हि प्रजापतिरादध्नोद् द्वादश रात्रीर्दीक्षितः स्याद् द्वादश मासाः सँव्वथ्सरः सँव्वथ्सरः प्रजापतिः प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसोऽधि जायते चतुर्धा वा एतास्तिस्रस्तिस्रो रात्रयो यद् द्वादशोपसदो याः प्रथमा यज्ञन्ताभिः सम्भरति या द्वितीया यज्ञन्ताभिरा रभते ॥ [३९] ॥ यास्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्तरतः शुन्धते यो वा अस्य पशुमत्ति माꣳसꣳ सोऽत्ति यः पुरोडाशम्मस्तिष्कꣳ स यः परिवापम्पुरीषꣳ स य आज्यम्म-ज्जानꣳ स यः सोमꣳ स्वेदꣳ सोऽपि ह वा अस्य शीर्षण्या निष्पदः प्रति गृह्णाति यो द्वादशाहे प्रतिगृह्णाति तस्माद् द्वादशाहेन न याज्यम्पाप्मनो व्यावृत्त्यै ॥ [४०] ॥

(अयच्छ दधि रभते द्वादशाहेन चत्वारि च) ॥ १० ॥

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहै कादशभ्यः स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा षोडशभ्यः स्वाहा सप्तद-शभ्यः स्वाहाऽष्टादशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहै कान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा सर्वस्मै स्वाहा ॥ [४१] ॥

(नवचत्वारिꣳशते स्वाहैकान्नैकविꣳशतिश्च) ॥ ११ ॥

एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहै कादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नव-विꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्ना शीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ [४२] ॥

(एकस्मै त्रिभ्यः पञ्चाशत्) ॥ १२ ॥

द्वाभ्याꣳ स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्वाहाऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहाऽष्टादशभ्यः स्वाहा विꣳशत्यै स्वाहाऽष्टानवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ [४३] ॥

(द्वाभ्यामष्टानवत्यै षड्विꣳशतिः) ॥ १३ ॥

त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाऽशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ [४४] ॥

(त्रिभ्यो ऽष्टाचत्वारिꣳशत्) ॥ १४ ॥

चतुर्भ्यः स्वाहाऽष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा विꣳशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ [४५] ॥

(चतुर्भ्यः षण्णवत्यै षोडश) ॥ १५ ॥

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विꣳशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ [४६] ॥

(पञ्चभ्यः पञ्चनवत्यै चतुर्दश) ॥ १६ ॥

दशभ्यः स्वाहा विꣳशत्यै स्वाहा त्रिꣳशते स्वाहा चत्वारिꣳशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ [४७] ॥

(दशभ्यो द्वाविꣳशतिः) ॥ १७ ॥

विꣳशत्यै स्वाहा चत्वारिꣳशते स्वाहा षष्ट्यै स्वाहाऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ [४८] ॥

(विꣳशत्यै द्वादश) ॥ १८ ॥

पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा त्रिभ्यः शतेभ्यः स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहाऽष्टाभ्यः शतेभ्यः स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा ॥ [४९] ॥

(पञ्चाशते द्वात्रिꣳशत्) ॥ १९ ॥

शताय स्वाहा सहस्राय स्वाहाऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहाऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मद्ध्याय स्वाहाऽन्ताय स्वाहा परार्द्धाय स्वाहोषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ [५०] ॥

(शतायाऽष्टात्रिꣳशत्) ॥ २० ॥

समाप्ति कोर्वैः

(सा॒ध्याः षड् रा॒त्रं कु॑सुरु॒बिन्द॑ः सप्तरा॒त्रं बृह॒स्पति॑रष्टरा॒त्रं प्र॒जाप॑ति॒स्ताः ख्षुध॑न्नवरा॒त्रं प्र॒जाप॑तिरकामयत॒ द॒श॑होतारात्र मृ॒तव॑ ऐन्द्रवाय॒वाग्रा᳚न् गाय॒त्रो वै प्र॒जाप॑ति॒ः स द्वा॑दशरा॒त्रं न वा एक॑स्मा॒ एक॑स्मै॒ द्वाभ्यां᳚ त्रि॒भ्यः च॒तुर्भ्यः॑ प॒ञ्चभ्यो॑ द॒शभ्यो॑ विꣳश॒त्यै प॑ञ्चा॒शते॑ श॒ताय॑ विꣳश॒तिः)

(सा॒ध्या अ॑स्मा इ॒मे लो॒का गा॑य॒त्रं वै तृ॒तीय॒ मेक॑स्मै पञ्चा॒शत्)

(सा॒ध्याः सर्व॑स्मै॒ स्वाहा᳚)

॥ हरिः ॐ ॥

सप्तमकाण्डे द्वितीयः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
२०	५०

ॐ